# || श्री स्वामी सामर्थ ||

---

## || सूर्य अथर्वशीर्ष ||

---

।श्री गणेशाय नमः।

। श्री स्वामी सामर्थाय नमः ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ।।

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।
ॐ शान्तिः! शान्तिः!! शान्तिः!!!

हरिः ॐ।। अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः।
ब्रह्मा ऋषिः। गायत्री छन्दः। आदित्यो देवता ।
हंसः सोऽहमग्निनारायणयुक्तं बीजम्।
हृल्लेखा शक्तिः। वियदादिसर्गसंयुक्तं कीलकम्।
चतुर्विधपुरुषार्थसिद्धयर्थे विनियोगः।

षट्स्वरारूढेन बीजेन षडङ्गं रक्ताम्बुजसंस्थितम्।

सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं
पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं
श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः।

ॐ भूर्भुवः स्वः।
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्।

सूर्य आत्मा जगतस्तस्थुषश्च।
सूर्याद्वै खल्विमानि भूतानि जायन्ते।
सूर्याद्यज्ञःपर्जन्योऽन्नमात्मा।
नमस्त आदित्य त्वमेव केवलं कर्मकर्तासि।
त्वमेव प्रत्यक्षं ब्रह्मासि।
त्वमेव प्रत्यक्षं विष्णुरसि। त्वमेव प्रत्यक्षं रुद्रोऽसि।
त्वमेव प्रत्यक्षमृगसि। त्वमेव प्रत्यक्षं यजुरसि।
त्वमेव प्रत्यक्षं सामासि।
त्वमेव प्रत्यक्षमथर्वासि।
त्वमेव सर्वं छन्दोऽसि।
आदित्याद्वायुर्जायते।
आदित्याद् भूमिर्जायते।
आदित्यादापो जायन्ते।
आदित्याज्ज्योतिर्जायते।

आदित्याद् व्योम दिशो जायन्ते।

आदित्याद्देवा जायन्ते।

आदित्याद्वेदा जायन्ते।

आदित्यो वा एष एतन्मण्डलं तपति।

असावादित्यो ब्रह्म।

आदित्योऽन्तःकरणमनोबुद्धिचित्ताहंकाराः।

आदित्यो वै व्यानः समानोदानोपानः प्राणः।

आदित्यो वै श्रोत्रत्वक्चक्षूरसनघ्राणाः।

आदित्यो वै वाक्पाणिपादपायूपस्थाः।

आदित्यो वै शब्दस्पर्शरूपरसगन्धाः।

आदित्यो वै वचनादानागमनविसर्गानन्दाः।

आनन्दमयो ज्ञानमयो विज्ञानमय आदित्यः।

नमो मित्रायभानवे मृत्योर्मा पाहि भ्राजिष्णवे विश्वहेतवे नमः।

सूर्याद् भवन्ति भूतानि सूर्येण पालितानि तु।

सूर्ये लयं प्राप्नुवन्ति यः सूर्यः सोऽहमेव च।

चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः।

चक्षुर्धाता दधातु नः।

आदित्याय विद्महे सहस्रकिरणाय धीमहि।

तन्नः सूर्यः प्रचोदयात्।

सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्।

सविता नः सुवतुसर्वतातिं सविता नो रासतां दीर्घमायुः।

ओमित्येकाक्षरं ब्रह्म घृणिरिति द्वे अक्षरे।
सूर्य इत्यक्षरद्वयम्।
आदित्य इति त्रीण्यक्षराणि।
एतस्यैव सूर्यस्याष्टाक्षरो मनुः।

यः सदाहरहर्जपति स वै ब्राह्मणो भवति।
स वै ब्राह्मणो भवति।
सूर्याभिमुखो जप्त्वा महाव्याधिभयात्प्रमुच्यते।
अलक्ष्मीर्नश्यति।
अभक्ष्यभक्षणात् पूतो भवति।
अगम्यागमनात्पूतो भवति।
पतितसम्भाषणात्पूतो भवति।
असत्सम्भाषणात्पूतो भवति।
मध्याह्ने सूर्याभि मुखः पठेत्।
सद्योत्पन्नपञ्चमहापातकात्प्रमुच्यते।
सैषां सावित्रीं विद्यां न किञ्चिदपि न कस्मैचित्प्रशंसयेत्।
य एतां महाभागः प्रातः पठति स भाग्यवाञ्जायते।
पशून् विन्दति।
वेदार्थाँल्लभते।
त्रिकालमेतज्जप्त्वा क्रतुशतफलमवाप्नोति।

यो हस्तादित्ये जपति स महामृत्युं तरति।
स महामृत्युं तरति।
य एवं वेद।

इत्युपनिषत्।

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥
॥श्री स्वामी समर्थापर्ण मस्तु॥

---